# શ્રીધન્વન્તર્યષ્ટોત્તરશતનામાવલિઃ

shrIdhanvantaryaShTottarashatanAmAvaliH

sanskritdocuments.org

May 6, 2018

# shrIdhanvantaryaShTottarashatanAmAvaliH

# શ્રીધન્વન્તર્યષ્ટોત્તરશતનામાવલિઃ

## Sanskrit Document Information

Text title : dhanvantaryaShTottarashatanAmAvaliH

File name : dhanvantaryaShTottarashatanAmAvaliH.itx

Category : vishhnu, aShTottarashatanAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 6, 2018

*sanskritdocuments.org*

# શ્રીધન્વન્તર્યષ્ટોત્તરશતનામાવલિઃ

ૐ ધન્વન્તરયે નમઃ । સુધાપૂર્ણકલશાઢ્યકરાય । હરયે ।
જરામૃતિત્રસ્તદેવપ્રાર્થનાસાધકાય । પ્રભવે । નિર્વિકલ્પાય ।
નિસ્સમાનાય । મન્દસ્મિતમુખામ્બુજાય । આઞ્જનેયપ્રાપિતાદ્રયે ।
પાર્શ્વસ્થવિનતાસુતાય । નિમગ્નમન્દરધરાય । કૂર્મરૂપિણે ।
બૃહત્તનવે । નીલકુઞ્ચિતકેશાન્તાય । પરમાદ્ભુતરૂપધૃતે ।
કટાક્ષવીક્ષણાશ્વસ્તવાસુકયે । સિંહવિક્રમાય ।
સ્મર્તૃહૃદ્રોગહરણાય । મહાવિષ્ણ્વંશસમ્ભવાય ।
પ્રેક્ષણીયોત્પલશ્યામાય નમઃ ॥ ૨૦

આયુર્વેદાધિદૈવતાય નમઃ । ભેષજગ્રહણાનેહસ્સ્મરણીયપદામ્બુજાય ।
નવયૌવનસમ્પન્નાય । કિરીટાન્વિતમસ્તકાય ।
નક્રકુણ્ડલસંશોભિશ્રવણદ્વયશષ્કુલયે । દીર્ઘપીવરદોર્દણ્ડાય ।
કમ્બુગ્રીવાય । અમ્બુજેક્ષણાય । ચતુર્ભુજાય । શઙ્ખધરાય ।
ચક્રહસ્તાય । વરપ્રદાય । સુધાપાત્રે પરિલસદામ્રપત્રલસત્કરાય ।
શતપદ્યાઢ્યહસ્તાય । કસ્તૂરીતિલકાઞ્ચિતાય । સુકપોલાય । સુનાસાય ।
સુન્દરભ્રૂલતાઞ્ચિતાય । સ્વઙ્ગુલીતલશોભાઢ્યાય ।
ગૂઢજત્રવે નમઃ ॥ ૪૦

મહાહનવે નમઃ । દિવ્યાઙ્ગદલસદ્બાહવે । કેયૂરપરિશોભિતાય ।
વિચિત્રરત્નખચિતવલયદ્વયશોભિતાય । સમોલ્લસત્સુજાતાંસાય ।
અઙ્ગુલીયવિભૂષિતાય । સુધાગન્ધરસાસ્વાદમિલદ્ભૃઙ્ગમનોહરાય ।
લક્ષ્મીસમર્પિતોત્ફુલ્લકઞ્જમાલાલસદ્ગલાય । લક્ષ્મીશોભિતવક્ષસ્કાય ।
વનમાલાવિરાજિતાય । નવરત્નમણીક્લૃપ્તહારશોભિતકન્ધરાય ।
હીરનક્ષત્રમાલાદિશોભારઞ્જિતદિઙ્મુખાય । વિરજોઽમ્બરસંવીતાય ।
વિશાલોરસે । પૃથુશ્રવસે । નિમ્નનાભયે । સૂક્ષ્મમધ્યાય ।
સ્થૂલજઙ્ઘાય । નિરઞ્જનાય । સુલક્ષણપદાઙ્ગુષ્ઠાય નમઃ ॥ ૬૦

સર્વસામુદ્રિકાન્વિતાય નમઃ । અલક્તકારક્તપાદાય । મૂર્તિમદ્વાર્ધિપૂજિતાય ।
સુધાર્થાન્યોન્યસંયુધ્યદ્દેવદૈતેયસાન્ત્વનાય । કોટિમન્મથસઙ્કાશાય ।
સર્વાવયવસુન્દરાય । અમૃતાસ્વાદનોદ્યુક્તદેવસઙ્ઘાપરિષ્ટુતાય ।
પુષ્પવર્ષણસંયુક્તગન્ધર્વકુલસેવિતાય ।
શઙ્ખતૂર્યમૃદઙ્ગાદિસુવાદિત્રાપ્સરોવૃતાય ।
વિષ્વક્સેનાદિયુક્પાર્શ્વાય । સનકાદિમુનિસ્તુતાય ।
સાશ્ચર્યસસ્મિતચતુર્મુખનેત્રસમીક્ષિતાય ।
સાશઙ્કસમ્ભ્રમદિતિદનુવંશ્યસમીડિતાય ।
નમનોન્મુખદેવાદિમૌલિરત્નલસત્પદાય । દિવ્યતેજઃપુઞ્જરૂપાય ।
સર્વદેવહિતોત્સુકાય । સ્વનિર્ગમક્ષુબ્ધદુગ્ધવારાશયે । દુન્દુભિસ્વનાય ।
ગન્ધર્વગીતાપદાનશ્રવણોત્કમહામનસે ।
નિષ્કિઞ્ચનજનપ્રીતાય નમઃ ॥ ૮૦

ભવસમ્પ્રાપ્તરોગહૃતે નમઃ । અન્તર્હિતસુધાપાત્રાય ।
મહાત્મને । માયિકાગ્રણ્યૈ । ક્ષણાર્ધમોહિનીરૂપાય ।
સર્વસ્ત્રીશુભલક્ષણાય । મદમત્તેભગમનાય ।
સર્વલોકવિમોહનાય । સ્રંસન્નીવીગ્રન્થિબન્ધાસક્તદિવ્યકરાઙ્ગુલયે ।
રત્નદર્વીલસદ્ધસ્તાય । દેવદૈત્યવિભાગકૃતે ।
સઙ્ખ્યાતદેવતાન્યાસાય । દૈત્યદાનવવઞ્ચકાય । દેવામૃતપ્રદાત્રે ।
પરિવેષણહૃષ્ટધિયે । ઉન્મુખોન્મુખદૈત્યેન્દ્રદન્તપઙ્ક્તિવિભાજકાય ।
પુષ્પવત્સુવિનિર્દિષ્ટરાહુરક્ષઃશિરોહરાય ।
રાહુકેતુગ્રહસ્થાનપશ્ચાદ્ગતિવિધાયકાય ।
અમૃતાલાભનિર્વિણ્ણયુધ્યદ્દેવારિસૂદનાય ।
ગરુત્મદ્વાહનારૂઢાય નમઃ ॥ ૧૦૦

સર્વેશસ્તોત્રસંયુતાય નમઃ ।
સ્વસ્વાધિકારસન્તુષ્ટશક્રવહ્ન્યાદિપૂજિતાય ।
મોહિનીદર્શનાયાતસ્થાણુચિત્તવિમોહકાય ।
શચીસ્વાહાદિદિક્પાલપત્નીમણ્ડલસન્નુતાય । વેદાન્તવેદ્યમહિમ્ને ।
સર્વલોકૈકરક્ષકાય । રાજરાજપ્રપૂજ્યાઙ્ઘ્રયે ।
ચિન્તિતાર્થપ્રદાયકાય ॥ ૧૦૮

ઇતિ શ્રીધન્વન્તર્યષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIdhanvantaryaShTottarashatanAmAvaliH*

pdf was typeset on May 6, 2018

Please send corrections to *sanskrit@cheerful.com*